# Unity and Hope

नामरूपात्मकं विश्वं दृश्यते यदिदं द्विधा।
तत्राद्यस्य कविर्वेधा द्वितीयस्य चतुर्मुखः॥

nāma-rūpātmakaṃ viśvaṃ dṛśyate yad idaṃ dvidhā.
tatrādyasya kavir vedhā dvitīyasya caturmukhaḥ..

आशा नाम मनुष्याणां काचिदाश्चर्यशृङ्खला।
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति कुत्रचित्॥

āśā nāma manuṣyāṇāṃ kācid āścarya-śṛṅkhalā.
yayā baddhāḥ pradhāvanti muktās tiṣṭhanti kutracit..

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः॥

āśā nāma nadī mano-ratha-jalā tṛṣṇā-taraṅgākulā
raga-grāhavatī vitarka-vihagā dhairya-drumadhvaṃsinī.
mohāvarta-sudustarātigahanā prottuṅga-cintā-taṭī
tasyāḥ pāragatā viśuddha-manaso nandanti yogīśvarāḥ..

रत्नैर्महाब्देस्तुतुषुर्न देवाः न भेजिरे भीमविषेण भीतिम्।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः॥

ratnair mahābdes tutuṣur na devāḥ na bhejire bhīma-viṣeṇa bhītim.
sudhāṃ vinā na prayayur virāmaṃ na niścitārthād viramanti dhīrāḥ..